# सञ्चारिणी दीपशिखा

सञ्चरति दीपशिखा। पञ्चमः अङ्कः पूज्यानां विवेकानन्दस्वामिचरणानां प्रयाणदिने, विश्वविद्यालयस्य च प्रतिष्ठादिने प्राकट्यम् आगतः इति महतः सन्तोषस्य विषयः। अस्मिन् अङ्के अष्टौ लेखाः सन्ति। एतद्विश्वविद्यालयस्य पूर्वच्छात्रः श्रीमान् तथागतमण्डलः (पि.एइच.डि.) मन्थरायाः चरित्रम् आश्रित्य सहृदयहृदयाह्लादिनं प्रबन्धं प्रस्तूय अस्माकं कार्तज्ञ्यभाग् भवति। अस्मिन् एव विश्वविद्यालये गवेषणकर्मणि निरतः श्रीमान् शैवाल आचार्यः महाकवेः भारवेः तत्कृतस्य किरातार्जुनीयमहाकाव्यस्य च सुष्ठु परिचयम् उपस्थाप्य समेषां संस्कृताध्येतॄणां महान्तम् उपकारं समपादयद् इति ऊहे। एवम् एव डॉ. सुकान्तमान्नाः नदीसंज्ञाविषये सचित्रं सप्रमाणं लेखं विलिख्य महत् उपाकरोत् व्याकरणजिज्ञासूनाम् इति प्रशस्यः सः। अपरः गवेषकः श्रीमान् राहुलमाइतिः करणसंज्ञासूत्रस्य गभीरं विश्लेषणं कृत्वा वैयाकरणानां जिज्ञासूनां पिपासां निवर्तयति इति श्लाघ्यः सः। राजद्वीपघोषः अस्मद्विश्वविद्यालयस्य समन्वितएम्.ए-कक्षायां पञ्चमवर्षे व्याकरणोपविभागे अधीयानः लघुशब्देन्दुशेखरानुसारं प्रत्याहारसूत्रं सुष्ठु विश्लेष्य स्नेहभाग् भवति अस्माकम्। विश्वविद्यालयस्य शास्त्राध्ययनाध्यापनपरम्परा ऊहितुं शक्नुवन्ति विद्वांसः अस्माद् लेखात्। पूर्ववत्, श्रीरामकृष्णलीलाप्रसङ्गस्य अनुवादाय धन्यतावचनैः भूष्यते शान्तनुनायेकः। अपि च, पूज्यैः गम्भीरानन्दस्वामिभिः विरचितस्य ब्रह्मानन्दस्वामिपादानां जीवनवृत्तस्य तथा च वन्दनीयचरणारविन्दैः ब्रह्मानन्दस्वामिपादैः सङ्कलितानां श्रीश्रीरामकृष्णोपदेशानाम् अनुवादं कृतवद्भ्यां ब्रह्मचारिभ्यां मनोमय-शुभदीपाभ्यां कृतज्ञता व्यज्यते।

प्रसङ्गेऽस्मिन् विश्वविद्यालयस्य प्रतिकुलाधिपतीनां श्रीमताम् आत्मप्रियानन्दस्वामिचरणान्, विभागाध्यक्षान् जपसिद्धानन्दस्वामिपादान् च प्रणमामः। पत्रिकायाः सम्पादने यथायथं साहाय्यम् आचरितवतां समेषां सकार्तज्ञ्यं स्मृत्वा विरमामो विस्तरात्।

मुख्यसम्पादकः